योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०२०

विंशः सर्गः २०

श्रीवसिष्ठ उवाच ।

संकल्पपुरुषस्त्वेष यद्यत्कल्पयति स्वयम् ।

तत्तथा तादृशं पञ्चभूतात्मा भवतीव खम् ।। १

सर्वं राम जगज्जातं तत्संकल्पं विदुर्बुधाः ।

तादृग्रूपं पञ्चकात्मविषयोन्मुखमाततम् ।। २

जगत्पदार्थसार्थस्य विराट् सर्वस्य कारणम् ।

कारणेन समान्येव कार्याणि च भवन्त्यतः ।। ३

यथैष स विराडेव विराट् प्रत्येकमात्मनि ।

स्वसंविदि प्रसरति बोधवान्न त्वबोधवान् ।। ४

आसरीसृपमारुद्रमेवमभ्युदितो भ्रमः ।

अणावप्यद्रिविस्तारो बीजकोश इव द्रुमः ।। ५

आसरीसृपमारुद्रं विराट् प्रत्येकमात्मनि ।

पराणावप्यनन्तात्मबोधतो न त्वबोधतः ।। ६

यादृगेव विराडात्मन्येष विस्तार आगतः ।

तादृगेवेह सर्वस्मिन्नणुमात्रेऽपि भूतके ।। ७

परमार्थेन न स्थूलं न सूक्ष्मं किंचन क्वचित् ।

यद्यथा विततं यत्र तत्तथाश्वनुभूयते ।। ८

मनश्चन्द्रमसो जातं मनसश्चन्द्र उत्थितः ।

जीवाज्जीवोऽथवैकैषा सत्ता द्रवजलाङ्गवत् ।। ९

शुक्रसारं विदुर्जीवं प्रालेयकणसंनिभम् ।

आनन्दोऽचलसंदोहस्तत एव प्रवर्तते ।। १०

तं चेतति तदाभासं पूर्णमात्मस्थमात्मना ।

तत्र तन्मयतां धत्ते तेन तन्मयरूपिणी ।। ११

जीवसंविदथैषान्तर्यदुपायाति पञ्चताम् ।

न तत्र कारणं किंचिद्विद्यते न च कार्यता ।। १२

प्रतियोगिव्यवच्छित्तेरभावात्स्वस्वभावयोः ।

स्वभावोक्तिर्न चैवात्र भवत्यर्थानुसारिणी ।। १३

जीवो जीवत्वमेव स्वजीवत्वादेव च स्वतः ।

अन्तस्त्वेन वहिष्ट्वेन दृश्यते न च वायुवत् ।। १४

नीहारेणेव संवीतश्चेत्यवस्तुपरायणः ।

जात्यन्ध इव पन्थानं मारुतात्मा न पश्यति ।। १५

जगज्जृम्भिकया जीवः स्वमैक्यं द्वित्वमास्थितः ।

स्पन्दशक्त्येव पवन आवृतात्मा न पश्यति ।। १६

अज्ञानस्य महाग्रन्थेर्मिथ्यावेद्यात्मनोऽसतः ।

अहमित्यर्थरूपस्य भेदो मोक्ष इति स्मृतः ।। १७ '

व्यपगतघनचेतनः समन्ता-

दहमिति नूनमबुध्यमान आस्व ।

अनभिधघनचेतनैकरूपः

क्षितसदसत्सदसत्सदोदितश्च ।। १८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मी० दे० मोक्षोपायेषु निर्वाणप्रकरणे उत्तरार्धे जीवनिर्वाणयोगोपदेशो नाम विंशः सर्गः ।। २० ।।